॥ श्री पंचमुखी हनुमत्कवचम् ॥

ॐ श्री गणेशाय नमः।

ॐ अस्य श्री पंचमुखी हनुमत्कवचमंत्रस्य ।
ब्रम्हा ऋषिः। गायत्री छंदः। पंचमुखविराट् हनुमान्
देवता।
ह्रीं बीजम् ।श्रीं शक्तिः ।क्रौं कीलकम् ।क्रूं कवचम्
।
क्रैं अस्त्राय फट् ।इति दिग्बन्धः ।
श्रीगरूड उवाच ॥
अथ ध्यानम् ॥
प्रवक्ष्यामि श्रुणु सर्वांगसुन्दरि ।
यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम् ॥१ ॥
पंचवक्त्रं महाभीमं त्रिपंचनयनैर्युतम् ।
बाहुभिर्दशभिर्युक्तमं सर्वकामार्थसिद्धिदम् ॥२ ॥
पूर्वं तु वानरं वक्त्रं कोटीसूर्यसमप्रभम् ।
दष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥३ ॥
अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् ।
अत्युग्रतेजोवपुषं भीषणं भयनाशनम् ॥४ ॥
पश्चिमं गारुडं वक्त्रं वक्त्रतुण्डं महाबलम् ।
सर्वनागप्रशमनं विषभूतादिकृन्तनम् ॥५ ॥
उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम् ।
पातालसिन्हवेतालज्वररोगादिकृन्तनम् ॥६ ॥
उर्ध्वं हयाननं घोरं दानवान्तकरं परम् ।
येन वक्त्रेण विप्रेन्द्र तारकाख्यं महासुरं ॥७ ॥
जघान शरणं तत्स्यात्सर्वशत्रुहरं परम् ।
ध्यात्वा पन्चमुखं रुद्रं हनूमंतं दयानिधिम् ॥८ ॥
खड्गं त्रिशूलं खट्वांगं पाशमंकुशपर्वतम् ।
मुश्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुम् ॥९ ॥
भिन्दिपालं ज्ञानमुद्रां दशभिर्मुनिपुंगवम् ।
एतान्यायुधजालानि धारयन्तं भजाम्यहम् ॥१० ॥
प्रेतासनोपविश्टं तं सर्वाभरणभुषितम् ।
दिव्यमाल्याम्बरधरं दिव्यगंधानुलेपनम् ॥
सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखम् ॥११ ॥
पंचास्यमच्युतमनेकविचित्रवर्णवक्त्रं शशांकशिखरं
कपिराजवर्यम् ।
पीताम्बरादिमुकुटैरूपशोभितांगं पिंगाक्षमाद्यमनिशं

मनसा स्मरामि ॥ १२ ॥
मर्कटेशं महोत्साहं सर्वशत्रुहरं परम् ।
शत्रुं संहर मां रक्ष श्रीमन्नापदमुद्धर ॥ १३ ॥
ॐ हरिमर्कट मर्कट मंत्रमिदं परिलिख्यति लिख्यति वामतले ।
यदि नश्यति नश्यति शत्रुकुलं यदि मुंचति मुंचति वामलता
॥ १४ ॥
ॐ हरिमर्कटाय स्वाहा ।
ॐ नमो भगवते पंचवदनाय पूर्वकपिमुखाय
सकलशत्रुसंहारकाय स्वाहा ।
ॐ नमो भगवते पंचवदनाय दक्षिणमुखाय करालवदनाय
नरसिंहाय सकलभूतप्रमथनाय स्वाहा ।
ॐ नमो भगवते पंचवदनाय पश्चिममुखाय गरूडाननाय
सकलविषहराय स्वाहा ।
ॐ नमो भगवते पंचवदनायोत्तरमुखायादिवराहाय
सकलसंपत्कराय स्वाहा ।
ॐ नमो भगवते पंचवदनायोर्ध्वमुखाय हयग्रीवाय
सकलजनवशंकराय स्वाहा ।
ॐ अस्य श्रीपंचमुखहनुमन्मन्त्रस्य श्रीरामचन्द्र ऋषिः ।
अनुष्टुप् छन्दः । पंचमुखवीरहनुमान् देवता ।
हनुमानिति बीजम् । वायुपुत्र इति शक्तिः ।
अंजनीसुत इति कीलकम् ।
श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ।
इति ऋष्यादिकं विन्यसेत् ।
ॐ अंजनीसुताय अंगुष्ठाभ्यां नमः ।
ॐ रूद्रमूर्तये तर्जनीभ्यां नमः ।
ॐ वायुपुत्राय मध्यमाभ्यां नमः ।
ॐ अग्निगर्भाय अनामिकाभ्यां नमः ।
ॐ रामदूताय कनिष्ठिकाभ्यां नमः ॥
इति करन्यासः ॥
ॐ अंजनीसूताय हृदयाय नमः ।
ॐ रुद्रमूर्तये शिरसे स्वाहा ।
ॐ वायुपुत्राय शिखायै वषट् ।
ॐ अग्निगर्भाय कवचाय हुम् ।
ॐ रामदूताय नेत्रत्रयाय वौषट् ।
ॐ पंचमुखहनुमते अस्त्राय फ़ट् ।
पंचमुखहनुमते स्वाहा ॥

इति दिग्बन्धः ॥
॥ अथ ध्यानं ॥
वन्देवानरनारसिंहखगराट् क्रीडाश्ववक्त्रान्विन्तम् ।
दिव्यालंकरणं त्रिपंचनयनं देदिप्यमानं ऋचा ।
हस्ताब्जैरसिखेटपुस्तकसुधासकुंभांकुशाद्रिंहलं
खट्वांगं
फ़णिभूरुहं दशभूजं सर्वारिवीरापहम् ॥ इति ॥
॥ अथ मन्त्रः ॥
ॐ श्रीरामदूतायान्जनेयाय वायुपुत्राय महाबलपराक्रमाय
सीतादुखनिवारणाय लंकादहनकारणाय महाबलप्रचण्डाय
फ़ाल्गुनसखाय कोलाहलसक लब्रम्हान्डविश्वरुपाय
सप्तसमुद्रनिर्लंघनाय
पिंगलनयनायामितविक्रमाय सूर्यबिंबफ़लसेवनाय
दुष्टनिवारणाय
द्रुष्टिनिरालंकृताय
सन्जीविनीसन्जिवितांगदलक्ष्मणमहाकपिसैन्यप्राणदाय
दशकण्ठविध्वंसनाय रामेष्टाय महाफ़ाल्गुनसखाय
सीतासहितरामवर्प्रदाय
षट्प्रयोगागमपंचमुखवीरहनुमन्मन्त्रजपे विनियोगः ॥
ॐ हरिमर्कटमर्कटाय बंबंबंबंबं वौषट् स्वाहा ।
ॐ हरिमर्कटमर्कटाय फ़ंफ़ंफ़ंफ़ंफ़ं फ़ट् स्वाहा ।
ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखें मारणाय
स्वाहा ।
ॐ हरिमर्कटमर्कटाय लुंलुंलुंलुंलुं
आकर्षितसकलसंपत्कराय स्वाहा ।
ॐ हरिमर्कटमर्कटाय धंधंधंधंधं
शत्रुस्तम्भनाय स्वाहा ।
ॐ टंटंटंटंटं कूर्ममूर्तये पंचमुखवीरहनुमते
परयन्त्रपरतन्त्रोच्चटनाय स्वाहा ।
ॐ कं खं गं घं ङं चं छं जं झं यैं त्रं टं
ठं डं ढं णं तं थं
दं धं नं पं फ़ं बं भं मं यं रं वं शं षं
सं हं ळं क्षं स्वाहा ॥
इति दिग्बन्धः ॥
ॐ पूर्वकपिमुखाय पंचमुखहनुमते टंटंटंटंटं
सकलशत्रुसंहारणाय स्वाहा ।

ॐ दक्षिणमुखाय पंचमुखहनुमते ॐ ह्रां ह्रीं ह्रूं ह्रैं
ह्रौं ह्रः सकलभूतप्रेतदमनाय स्वाहा ।
ॐ पश्चिममुखाय गरुडाननाय पंचमुखहनुमते
मंमंमंमंमं सकलविषहराय स्वाहा ।
ॐ उत्तरमुखायादिवराहाय लंलंलंलंलं नृसिंहाय
नीलकंठमूर्तये पंचमुखहनुमते स्वाहा ।
ॐ उर्ध्वमुखाय हयग्रीवाय रुंरुंरुंरुंरुं रुद्रमूर्तये
सकलप्रयोजननिर्वाहकाय स्वाहा ।
ॐ अंजनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय
श्रीरामचंद्रकृपापादुकाय
महावीर्यप्रमथनाय ब्रम्हाण्डनाथाय कामदाय
पंचमुखवीरहनुमते स्वाहा ।
भूतप्रेतपिशाचब्रम्हराक्षसशाकिनीदाकिन्यन्तरिक्षग्रहपर
यन्त्रपर तन्त्रोच्चाटनाय स्वाहा ।
सकलप्रयोजननिर्वाहकाय पंचमुखवीरहनुमते
श्रीरामवरप्रसादाय जंजंजंजंजं स्वाहा ।
इदं कवचं पठित्वा तु महाकवचं पठेन्नरः ।
एकवारं जपेत्स्तोत्रं सर्वशत्रुनिवारणम् ॥ १५ ॥
द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनम् ।
त्रिवारं च पठेन्नित्यं सर्वसंपत्करं शुभम् ॥ १६ ॥
चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम् ।
पंचवारं पठेन्नित्यं सर्वलोकवशंकरम् ॥ १७ ॥
षड्वारं च पठेन्नित्यं सर्वदेववशंकरम् ।
सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम् ॥ १८ ॥
अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम् ।
नववारं पठेन्नित्यं राजभोगमवाप्नुयात् ॥ १९ ॥
दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम् ।
रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवेद्धृवम ॥ २० ॥
निर्बलो रोगयुक्तश्च महाव्याध्यादिपीदितः ।
कवचस्मरणेनैव महाबलमवाप्नुयात् ॥ २१ ॥
॥ इति श्री सुदर्शनसंहितायां श्रीरामचन्द्रसीताप्रोक्तं
श्रीपंचमुखहनुमत्कवचं संपूर्णम् ॥
॥ श्रीकृष्णार्पणमस्तु ॥